# Mahagayatri Khadgamala Stotram

# महागायत्री खड्गमाला स्तोत्रम्

## Document Information

Text title : Mahagayatri Khadgamala Stotram

File name : mahAgAyatrIkhaDgamAlAstotram.itx

Category : devii, devI, gAyatrI, stotra

Location : doc_devii

Transliterated by : Rukmini Goswami

Proofread by : Rukmini Goswami

Latest update : August 4, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 4, 2026

*sanskritdocuments.org*

# महागायत्री खड्गमाला स्तोत्रम्

ॐ अस्य श्रीचतुर्वेदोक्तमहागायत्री-महालेखिनीश्वरी-महामहासरस्वती-परमेश्वरी-शुद्धशक्तिमहामन्त्रस्य उपस्थेन्द्रियाधिष्ठायी वरुणादित्यः, परब्रह्मपराशक्तिः, महाविराड्विश्वरूपः, सङ्कर्षणः, चित्रगुप्तधर्मराजः, स्वर्णाकर्षणभैरवः, भैरवादिमहाशिवात्मकध्यानपरिपूर्णानन्दपरशिवा ऋषयः । ऋग्यजुःसामाथर्वाणि छन्दांसि । अकारादिक्षकारान्तं तत्सदोङ्कारात्मकं परब्रह्म महापरभट्टारक महापीठस्थित परब्रह्मभैरवनिलया श्रीसहस्रभुजा महागायत्री लेखिनी सरस्वती परब्रह्मसुन्दरी महाविद्या श्रीमती महात्रिपुरसुन्दरी श्रीमाता देवता । प्रणवो बीजम् । भूर्भुवःस्वरादिव्याहृतयः शक्तयः । गायत्री कीलकम् । वेदमाता कवचम् । ब्रह्मविद्या हृदयम् । परावाक् गुह्यम् । चिदाकाशमस्त्रम् । सर्वमातृका मुद्राः । सर्वमन्त्ररहस्यं विनियोगः ।
ध्यानम् ।
ॐ बालां विद्यां तु गायत्रीं लोहितां चतुराननाम् ।
रक्ताम्बर द्वयो पेतामक्षसूत्रकरां तथा ।
कमण्डलुधरां देवीं हंसवाहन संस्थिताम् ।
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोक निवासिनीम् ॥

मध्याह्ने विष्णुरूपां च तार्क्ष्यस्थां पीतवाससाम् ।
युवतीं च यजुर्वेदां सूर्यमण्डल संस्थिताम् ॥

सायाह्ने शिवरूपां च वृद्धां वृषभवाहिनीम् ।
सूर्यमण्डलमध्यस्थां सामवेदसमायुताम् ॥

नमो नमस्ते गायत्रि सावित्रि त्वां नमाम्यहम् ।
सरस्वति नमस्तुभ्यं तुरीये ब्रह्मरूपिणी ॥

करन्यासः -
ॐ तत्सवितुर्वरेण्यं अङ्गुष्ठाभ्यां नमः । भर्गो देवस्य तर्जनीभ्यां नमः । धीमहि मध्यमाभ्यां नमः । धियो यो नः अनामिकाभ्यां नमः । प्रचोदयात् कनिष्ठिकाभ्यां नमः । ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः ॥

अङ्गन्यासः -

ॐ तत्सवितुर्वरेण्यं हृदयाय नमः । भर्गो देवस्य शिरसे स्वाहा । धीमहि शिखायै वषट् । धियो यो नः कवचाय हुम् । प्रचोदयात् नेत्रत्रयाय वौषट् । ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् अस्त्राय फट् ॥

अथ स्तोत्रम् ।
ॐ ऐं ह्रीं श्रीं ॡीम् ।
श्रीलेखिनी हृदयदेवि । शिरोदेवि । शिखादेवि । कवचदेवि । नेत्रदेवि । अस्त्रदेवि । गुह्यदेवि । पाददेवि । सर्वाङ्गदेवि ।
महालेखे । परालेखे । चिदालेखे । ब्रह्मलेखे । विश्वलेखे । काललेखे । कर्मलेखे । भाग्यलेखे । आयुर्लेखे । श्रीलेखे । यशोलेखे । विद्यालेखे । मेधालेखे । प्रज्ञालेखे । धृतिलेखे । स्मृतिलेखे । श्रद्धालेखे । बुद्धिलेखे । विमर्शलेखे । चैतन्यलेखे । मूललेखे । सूत्रलेखे । अक्षरलेखे । वर्णलेखे । मन्त्रलेखे । तन्त्रलेखे । यन्त्रलेखे । शास्त्रलेखे । वेदलेखे । आगमलेखे । पुराणलेखे । निगमलेखे । रहस्यलेखे । गुह्यलेखे । महागुह्यलेखे । सर्वलेखस्वरूपिणि ।
दिव्यौघगुरुरूपिणि ।
पराशक्तिमयी । परमेश्वरमयी । श्रीपरमकृष्णमयी । महाविराड्विष्णुमयी । हिरण्यगर्भमयी । दत्तात्रेयमयी । दक्षिणामूर्तिमयी । सनकमयी । सनन्दनमयी । सनातनमयी । सनत्कुमारमयी । नारायणमयी । ईश्वरमयी । अनन्तमयी । स्वयम्भूमयी । दिव्यगुरुमयी ।
सिद्धौघगुरुरूपिणि ।
वसिष्ठमयी । कपिलमयी । प्रह्लादमयी । दशाननमयी । कुबेरमयी । मनुमयी । श्रीमहालक्ष्मीमयी । भृगुमयी । अत्रिमयी । अङ्गिरसमयी । याज्ञवल्क्यमयी । मार्कण्डेयमयी । शुकमयी । नारदमयी । विश्वामित्रमयी । सिद्धगुरुमयी ।
मानवौघगुरुरूपिणि ।
श्रीअगस्त्यमयी । क्रियागुरुमयी । आनन्दनाथमयी । मत्स्येन्द्रनाथमयी । गोरक्षनाथमयी । नवनाथमयी । जालन्धरनाथमयी । कानिफनाथमयी । चर्पटनाथमयी । गहिनीनाथमयी । निवृत्तिनाथमयी । ज्ञानेश्वरमयी । सोपाननाथमयी । मुक्तानाथमयी । मानवगुरुमयी ।
श्रीगुरुरूपिणि । परमगुरुरूपिणि । परापरगुरुरूपिणि । परमेष्ठिगुरुरूपिणि ।
परब्रह्मभैरवसहिता ।
हृदयशक्ति । शिरःशक्ति । शिखाशक्ति । कवचशक्ति । नेत्रशक्ति । अस्त्रशक्ति । इच्छाशक्ति । ज्ञानशक्ति । क्रियाशक्ति । पराशक्ति । आदिशक्ति । चिद्शक्ति । महाशक्ति । योगशक्ति । अमोघशक्ति । अनुग्रहशक्ति । निग्रहशक्ति । सृष्टिशक्ति । स्थितिशक्ति । संहारशक्ति । तिरोधानशक्ति । अनुग्रहशक्ति ।

हृल्लेखे । महालेखे । वागीशि । वर्णेशि । मातृके । स्वरे । व्यञ्जने । बीजे । नादे । बिन्दौ । कलायै । कलातीतायै । विमर्शिनि । संविद्रूपिणि । महाचिदाकाशरूपिणि । अक्षरब्रह्मस्वरूपिणि ।
सर्वज्ञानप्रदचक्रस्वामिनि ।
अणिमासिद्धे । महिमासिद्धे । गरिमासिद्धे । लघिमासिद्धे । प्राप्तिसिद्धे । प्राकाम्यसिद्धे । ईशित्वसिद्धे । वशित्वसिद्धे । कामावसायितासिद्धे । दूरदर्शनसिद्धे । दूरश्रवणसिद्धे । मनोजवसिद्धे । परकायप्रवेशसिद्धे । त्रिकालज्ञानसिद्धे । वाक्सिद्धे । लेखनसिद्धे । ग्रन्थसिद्धे । काव्यसिद्धे । मन्त्रसिद्धे । तन्त्रसिद्धे । यन्त्रसिद्धे । योगसिद्धे । समाधिसिद्धे । निर्विकल्पसिद्धे । ब्रह्मसाक्षात्कारसिद्धे । सर्वसिद्धिप्रदे ।
सर्वसिद्धिप्रदचक्रस्वामिनि ।
॥ सर्वब्रह्ममयचक्रस्वामिनि ॥

गायत्रीसहितपरब्रह्ममयि । सावित्रीसहितविष्णुमयि । सरस्वतीसहितरुद्रमयि । कालीसहितकृष्णमयि । तारासहितरामचन्द्रमयि । भुवनेश्वरीसहितसदाशिवमयि । षोडशीसहितकामेश्वरमयि । भैरवीसहितकालभैरवमयि । छिन्नमस्तासहितकबन्धभैरवमयि । धूमावतीसहिताघोरभैरवमयि । बगलामुखीसहितएकवक्रभैरवमयि । मातङ्गीसहितमतङ्गभैरवमयि । कमलासहितनारायणमयि । अन्नपूर्णासहितविश्वेश्वरमयि । लक्ष्मीसहितकुबेरमयि । राधासहितगोपीजनवल्लभमयि । सीतासहितरघुनाथमयि । उमासहितमहेश्वरमयि । रमासहितपरमपुरुषमयि । शचीसहितपुरन्दरमयि । स्वाहासहितवह्निमयि । स्वधासहितपितृमयि । रोहिणीसहितसोममयि । संज्ञासहितभास्करमयि । विनतासहितगरुडमयि । देवसेनासहितस्कन्दमयि । ऋद्धिसिद्धिसहितगणपतिमयि । तुलसीसहितदामोदरमयि । गङ्गासहितशम्भुमयि । यमुनासहितमधुसूदनमयि । वाग्देवीसहितवेदमयि । महामायासहितपरतत्त्वमयि । सर्वदैवतमयि ।
सर्वसम्पत्प्रदचक्रस्वामिनि ।
ऋग्वेदमयि । यजुर्वेदमयि । सामवेदमयि । अथर्ववेदमयि । शिक्षामयि । कल्पमयि । व्याकरणमयि । निरुक्तमयि । छन्दोमयि । ज्योतिष्मयि । मीमांसामयि । वेदान्तमयि । आगममयि । निगममयि । तन्त्रमयि । यन्त्रमयि । मन्त्रमयि । सूत्रमयि । इतिहासमयि । पुराणमयि । सर्वशास्त्रमयि ।
सर्वविद्यामयचक्रस्वामिनि ।
अकारमयि । आकारमयि । इकारमयि । ईकारमयि । उकारमयि । ऊकारमयि । ऋकारमयि । ॠकारमयि । ऌकारमयि । ॡकारमयि । एकारमयि । ऐकारमयि । ओकारमयि । औकारमयि । अङ्कारमयि । अःकारमयि । ककारादिक्षकारान्तमातृकामयि । पञ्चाशद्वर्णमयि । नादमयि । बिन्दुमयि । कलामयि । व्यापिकामयि । समनामयि । उन्मनामयि । महाशून्यमयि ।

चिदाकाशमयि । परावाङ्मयि । पश्यन्तीमयि । मध्यमामयि । वैखरीमयि ।
सर्वमातृकामयचक्रस्वामिनि ।
श्रीमहेश्वरि । महामहाविद्ये । महामहाशक्ते । महामहाश्रये । महामहाभोगे । महामहायोगे । महामहाकल्याणि । महामहामङ्गले । महामहामङ्गलमूर्ते । महामहासौभाग्यदायिनि । महामहासिद्धिदायिनि । महामहावागीश्वरि । महामहालेखेश्वरि । महामहागुह्ये । महामहारहस्ये । महामहापरदेवते । महामहापराशक्ते । महामहापरमेश्वरि । महामहामात्रिके । महामहागायत्रि । महामहात्रिपुरे । महामहाभुवनेश्वरि । महामहाचिदम्बरेश्वरि । महामहाब्रह्मविद्ये । महामहापूर्णानन्दे । महामहामुक्तिदायिनि । महामहाकरुणामयि । महामहाज्ञानस्वरूपिणि । महामहाश्रीपरब्रह्मबिन्दो । श्रीमन्नगरनिलये । श्रीअनन्तकोटिब्रह्माण्डनायिके महामहाश्रीमहाराज्ञि ।
नमस्ते नमस्ते नमस्ते नमः ।
ॐ ऐं ह्रीं श्रीं लीं स्वाहा ॥

इत्येतत् कथितं देवि श्रीलेखिन्याः परं महत् ।
खड्गमालामयं दिव्यं रहस्यानामपि रहः ॥

नैतत् वेदैर्न शास्त्रैश्च न पुराणशतैरपि ।
लभ्यते तपसा घोरे गुरुभक्त्यैव लभ्यते ॥

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
अभक्ताय न दातव्यं निन्दकाय कदाचन ॥

भक्ताय गुरुभक्ताय शान्तचित्ताय योगिने ।
दद्यात् परीक्ष्य विधिना सर्वसिद्धिप्रदं परम् ॥

यः पठेन्नित्यकालं तु श्रद्धाभक्तिसमन्वितः ।
तस्य भाग्यलिपिर्दिव्या स्वयं देवी प्रलिख्यते ॥

दुर्भाग्यरेखाः सर्वास्तु क्षीयन्ते क्षणमात्रतः ।
सौभाग्यसञ्चयो नित्यं वर्धते च दिने दिने ॥

अलिखितं लिखितं चैव दुष्टलेखं विनश्यति ।
दैवरेखा शुभा भूत्वा प्रसन्ना जायते ध्रुवम् ॥

दरिद्रो धनवान् भूयादविद्वान् वेदपारगः ।
मूकः स्याद्वाक्पतिः सद्यो निर्बलः सिंहविक्रमः ॥

अकीर्तिर्विपुलां कीर्तिं निर्लक्ष्मीर्लभते श्रियम् ।

अपुत्रः पुत्रमाप्नोति निर्गृहो मन्दिरं लभेत् ॥

गद्यपद्यप्रबन्धेषु स्वतन्त्रं जायते मनः ।
अलिखितोऽपि ग्रन्थार्थः स्वयमेव प्रकाशते ॥

वाग्देवी तस्य जिह्वाग्रे नित्यवासं प्रपद्यते ।
लेखिनी हस्तपद्मे च नृत्यतीव मुहुर्मुहुः ॥

यत्रैतत्पठ्यते नित्यं पूज्यते वा समाहितैः ।
तत्र लक्ष्मीर्ध्रुवा नित्यं जयश्रीर्नापसर्पति ॥

भूर्जपत्रे समालिख्य गोरोचनकुङ्कुमैः ।
धारयेद्यदि भक्त्या वै सर्वरक्षाकरं परम् ॥

राजद्वारे सभामध्ये सङ्ग्रामे शत्रुसङ्कटे ।
वने जले गिरौ दुर्गे न भयं तस्य जायते ॥

भूतप्रेतपिशाचाद्या डाकिन्यो योगिनीगणाः ।
दृष्ट्वैव दूरतो यान्ति खड्गमालाप्रभावतः ॥

यक्षरक्षोग्रहव्याधिदारिद्र्योपद्रवास्तथा ।
नश्यन्ति स्मरणादस्य वह्नौ तूलमिव क्षणात् ॥

अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं च प्रसिद्यति ॥

त्रिकालज्ञानसम्पत्तिर्दूरदृष्टिर्मनोरथः ।
परचित्तावबोधश्च गुरुपादप्रसादतः ॥

चतुःषष्टिकलाः सर्वा विद्याश्चाष्टादश स्मृताः ।
अनायासेन सिद्ध्यन्ति लेखिनीपरितोषतः ॥

न मन्त्रः सदृशोऽस्यास्ति न विद्या न च देवता ।
न तीर्थं न तपो दानं न योगो न च साधनम् ॥

यत्र गायत्र्यधिष्ठानं यत्र श्रीत्रिपुरा स्वयम् ।
यत्र ब्रह्म परं ज्योतिस्तत्र लेखिन्यवस्थितिः ॥

यत्र लेखिन्यधिष्ठानं तत्र वेदाश्चतुर्दश ।
तत्र सर्वाणि तन्त्राणि तत्र सर्वा महाविद्याः ॥

यत्र सा परमालेखा तत्र श्रीपरब्रह्म तत् ।
यत्र परब्रह्म तत्रैव न पुनर्जन्म विद्यते ॥

इदं स्तोत्रं महागुह्यं खड्गमालामनुत्तमम् ।
सर्वमन्त्रेषु मन्त्रेन्द्रं सर्वतन्त्रेषु तन्त्रराट् ॥

लेखिनीप्रीतिदं नित्यं ब्रह्मसाम्राज्यदायकम् ।
भुक्तिं मुक्तिं च विज्ञानं स्वयमेव प्रयच्छति ॥

॥ इति श्रीसिद्धाश्रमोक्ते गुप्तयामले श्रीलेखिनीरहस्ये श्रीभैरवभैरवीसंवादे परब्रह्म महागायत्री खड्गमाला स्तोत्रं सम्पूर्णम् ॥

गायत्री यन्त्र स्तोत्रं अथवा गायत्री सिद्ध शक्ति मालामन्त्रं च

Encoded and proofread by Rukmini Goswami

*Mahagayatri Khadgamala Stotram*
pdf was typeset on August 4, 2026

Please send corrections to *sanskrit@cheerful.com*